# ॥ वाल्मीकि रामायण ॥

## ६ युद्धकाण्ड

### अध्याय ३६

ततो द्यां पृथिवीं चैव वीक्षमाणा वनौकसः ।
ददृशुः सन्ततौ बाणैर्भ्रातरौ रामलक्ष्मणौ ॥ १ ॥

वृष्टवेवोपरते देवे कृतकर्मणि राक्षसे ।
आजगामाथ तं देशं ससुग्रीवो विभीषणः ॥ २ ॥

नीलद्विविदमैन्दाश्च सुषेणसुमुखाङ्गदाः ।
तूर्णं हनुमता सार्धमन्वशोचन्त राघवौ ॥ ३ ॥

निश्चेष्टौ मन्दनिःश्वासौ शोणितौघपरिप्लुतौ ।
शरजालाचितौ स्तब्धौ शयानौ शरतल्पयोः ॥ ४ ॥

निःश्वसन्तौ यथा सर्पौ निश्चेष्टौ मन्दविक्रमौ ।
रुधिरस्रावदिग्धाङ्गौ तापनीयाविव ध्वजौ ॥ ५ ॥

तौ वीरशयने वीरौ शयानौ मन्दचेष्टितौ ।
यूथपैस्तैः परिवृतौ बाष्पव्याकुललोचनैः ॥ ६ ॥

राघवौ पतितौ दृष्ट्वा शरजालसमावृतौ ।
बभूवुर्व्यथिताः सर्वे वानराः सविभीषणाः ॥ ७ ॥

अन्तरिक्षं निरीक्षन्तो दिशः सर्वाश्च वानराः ।
न चैनं मायया छन्नं ददृशू रावणिं रणे ॥ ८ ॥

तं तु मायाप्रतिच्छिन्नं माययैव विभीषणः ।
वीक्षमाणो ददर्शाथ भ्रातुः पुत्रमवस्थितम् ॥ ९ ॥

तमप्रतिम कर्माणमप्रतिद्वन्द्वमाहवे ।
ददर्शान्तर्हितं वीरं वरदानाद्विभीषणः ॥ १० ॥

इन्द्रजित्त्वात्मनः कर्म तौ शयानौ समीक्ष्य च ।
उवाच परमप्रीतो हर्षयन्सर्वनैरृतान् ॥ ११ ॥

दूषणस्य च हन्तारौ खरस्य च महाबलौ ।
सादितौ मामकैर्बाणैर्भ्रातरौ रामलक्ष्मणौ ॥ १२ ॥

नेमौ मोक्षयितुं शक्यावेतस्मादिषुबन्धनात् ।
सर्वैरपि समागम्य सर्षिसङ्घैः सुरासुरैः ॥ १३ ॥

यत्कृते चिन्तयानस्य शोकार्तस्य पितुर्मम ।
अस्पृष्ट्वा शयनं गात्रैस्त्रियामा याति शर्वती ॥ १४ ॥

कृत्स्नेयं यत्कृते लङ्का नदी वर्षास्विवाकुला ।
सोऽयं मूलहरोऽनर्थः सर्वेषां निहतो मया ॥ १५ ॥

रामस्य लक्ष्मणस्यैव सर्वेषां च वनौकसाम् ।
विक्रमा निष्फलाः सर्वे यथा शरदि तोयदाः ॥ १६ ॥

एवमुक्त्वा तु तान्सर्वान्राक्षसान्परिपार्श्वगान् ।
यूथपानपि तान्सर्वांस्ताडयामास रावणिः ॥ १७ ॥

तानर्दयित्वा बाणौघैस्त्रासयित्वा च वानरान् ।
प्रजहास महाबाहुर्वचनं चेदमब्रवीत् ॥ १८ ॥

शरबन्धेन घोरेण मया बद्धौ चमूमुखे ।
सहितौ भ्रातरावेतौ निशामयत राक्षसाः ॥ १९ ॥

एवमुक्तास्तु ते सर्वे राक्षसाः कूटयोधिनः ।
परं विस्मयमाजग्मुः कर्मणा तेन तोषिताः ॥ २० ॥

विनेदुश्च महानादान्सर्वे ते जलदोपमाः ।
हतो राम इति ज्ञात्वा रावणिं समपूजयन् ॥ २१ ॥

निष्पन्दौ तु तदा दृष्ट्वा तावुभौ रामलक्ष्मणौ ।
वसुधायां निरुच्छ्वासौ हतावित्यन्वमन्यत ॥ २२ ॥

हर्षेण तु समाविष्ट इन्द्रजित्समितिञ्जयः ।
प्रविवेश पुरीं लङ्कां हर्षयन्सर्वनैरृतान् ॥ २३ ॥

रामलक्ष्मणयोर्दृष्ट्वा शरीरे सायकैश् चिते ।
सर्वाणि चाङ्गोपाङ्गानि सुग्रीवं भयमाविशत् ॥ २४ ॥

तमुवाच परित्रस्तं वानरेन्द्रं विभीषणः ।
सबाष्पवदनं दीनं शोकव्याकुललोचनम् ॥ २५ ॥

अलं त्रासेन सुग्रीव बाष्पवेगो निगृह्यताम् ।

एवं प्रायाणि युद्धानि विजयो नास्ति नैष्ठिकः ॥ २६॥

सशेषभाग्यतास्माकं यदि वीर भविष्यति ।
मोहमेतौ प्रहास्येते भ्रातरौ रामलक्ष्मणौ ॥ २७॥

पर्यवस्थापयात्मानमनाथं मां च वानर ।
सत्यधर्मानुरक्तानां नास्ति मृत्युकृतं भयम् ॥ २८॥

एवमुक्त्वा ततस्तस्य जलक्लिन्नेन पाणिना ।
सुग्रीवस्य शुभे नेत्रे प्रममार्ज विभीषणः ॥ २९॥

प्रमृज्य वदनं तस्य कपिराजस्य धीमतः ।
अब्रवीत्कालसम्प्राप्तमसम्भ्रान्तमिदं वचः ॥ ३०॥

न कालः कपिराजेन्द्र वैक्लव्यमनुवर्तितुम् ।
अतिस्नेहोऽप्यकालेऽस्मिन्मरणायोपपद्यते ॥ ३१॥

तस्मादुत्सृज्य वैक्लव्यं सर्वकार्यविनाशनम् ।
हितं रामपुरोगाणां सैन्यानामनुचिन्त्यताम् ॥ ३२॥

अथ वा रक्ष्यतां रामो यावत्संज्ञा विपर्ययः ।
लब्धसंज्ञौ तु काकुत्स्थौ भयं नो व्यपनेष्यतः ॥ ३३॥

नैतत्किं चन रामस्य न च रामो मुमूर्षति ।
न ह्येनं हास्यते लक्ष्मीर्दुर्लभा या गतायुषाम् ॥ ३४॥

तस्मादाश्वासयात्मानं बलं चाश्वासय स्वकम् ।
यावत्सर्वाणि सैन्यानि पुनः संस्थापयाम्यहम् ॥ ३५॥

एते ह्युत्फुल्लनयनास्त्रासादागतसाध्वसाः ।
कर्णे कर्णे प्रकथिता हरयो हरिपुङ्गव ॥ ३६॥

मां तु दृष्ट्वा प्रधावन्तमनीकं सम्प्रहर्षितुम् ।
त्यजन्तु हरयस्त्रासं भुक्तपूर्वाम् इव स्रजम् ॥ ३७॥

समाश्वास्य तु सुग्रीवं राक्षसेन्द्रो विभीषणः ।
विद्रुतं वानरानीकं तत्समाश्वासयत्पुनः ॥ ३८॥

इन्द्रजित्तु महामायः सर्वसैन्यसमावृतः ।
विवेश नगरीं लङ्कां पितरं चाभ्युपागमत् ॥ ३९॥

तत्र रावणमासीनमभिवाद्य कृताञ्जलिः ।
आचचक्षे प्रियं पित्रे निहतौ रामलक्ष्मणौ ॥ ४०॥

उत्पपात ततो हृष्टः पुत्रं च परिषस्वजे ।
रावणो रक्षसां मध्ये श्रुत्वा शत्रू निपातितौ ॥ ४१॥

उपाघ्राय स मूर्ध्न्येनं पप्रच्छ प्रीतमानसः ।
पृच्छते च यथावृत्तं पित्रे सर्वं न्यवेदयत् ॥ ४२॥

स हर्षवेगानुगतान्तरात्मा
श्रुत्वा वचस्तस्य महारथस्य ।
जहौ ज्वरं दाशरथेः समुत्थितं
प्रहृष्य वाचाभिननन्द पुत्रम् ॥ ४३॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com